**कोजागर** पु॰ को जागर्त्ति इति लक्ष्म्या उक्तिरत्र काले पृषो॰। आश्विनपौर्णमास्याम्। तत्कृत्यव्यवस्थादि ति॰ त॰ कल्पतरौ ब्रह्मपुराणम् "आश्वयुज्यां पौर्णमास्यां निकुम्भो बालकार्णवात्। आयाति सेनया सार्द्धं कृत्वा युद्धं सुदारुणम्। तस्मात्तत्र नरैर्मार्गाः स्वगेहस्य समीपतः। शोधितव्याः प्रयत्नेन भूषितव्याश्च सत्तृणैः। पुष्पार्घ्य-फलमल्लान्नसर्षपप्रकरैस्तथा। वेश्मानि भूषितव्यानि नानावर्णैर्विशेषतः। सुस्नातैरनुलिप्तैश्च नरैर्भाव्यं सबान्धवैः। दिवा तत्र न भोक्तव्यं मनुष्यैश्च विवेकिभिः। स्त्रीबालमूर्खवृद्धैश्च भोक्तव्यं पूजितैः सुरैः"। पूजितैः सुरैः पूजितसुरैरित्यर्थः। "पूज्याश्च सफलैः पुष्पैस्तथा द्वारोर्द्ध्वभित्तयः। द्वारोपान्ते सुदीप्तस्तु संपूज्यो हव्यवाहनः। यवाक्ततघृतोपेतैस्तण्डुलैश्च सुतर्पितः। संपूजितव्यः पूर्णेन्दुः पयसा पायसेन च। स्कन्दः सभार्य्यो रुद्रश्च तथा नन्दीश्वरो मुनिः। गोमद्भिः सुरभिः पूज्या छागवद्भिर्हुताशनः। उरभ्रवद्भिर्व्वरुणो गजवद्भिर्विनायकः। पूज्यः साश्वैश्च रेवन्तो यथाविभवविस्तरैः। ततः पूज्यो निकुम्भोऽपि समांसैस्तिलतण्डुलैः। सुगन्धिभिर्घृतोपेतैः कृशराख्यैश्च भूरिभिः। ब्राह्मणान् भोजयित्वा तु भोक्तव्यं मांसवर्जितम्। वह्निपार्श्वगतैर्नेया दृष्ट्वा क्रीड़ाः पृथग्विधाः"। ततश्च द्वारोर्द्ध्वभित्तिहव्यवाहपूर्णेन्दुसभार्य्यरुद्रस्कन्दनन्दीश्वरमुनयः सर्व्वे पूज्याः। द्वारोर्द्ध्वभित्तिशब्दोऽत्र बहुवचनान्तः। नन्दीश्वरो मुनिरेकः। गोमता सुरभिः, छागवता हुताशनः मेषवता वरुणः, हस्तिमता विनायकः, अश्ववता रेवन्तः सर्व्वैरेव निकुम्भः पूज्यः, महार्णवे लिङ्गपुराणम्। "आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि। कौमुदी सा समाख्याता कार्य्या लोकविभूतये। कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावते स्थितम्। सुगन्धिर्निशि सद्वेशो अक्षैर्ज्जागरणं चरेत्"। तथा "निशीथे वरदा लक्ष्मीः कोजागर्त्तीति भाषिणी। तस्मै वित्तं प्रयच्छामि अक्षैः क्रीड़ां करोति यः। नारिकेलैश्चिपिटकैः पितॄन् देवान् समर्च्चयेत्। बन्धूंश्च प्रीणयेत्तेन स्वयं तदशनो भवेत्"। अत्र निशीति निशीथ इति चाभिधानात् रात्रिकृत्यमिदम्। ततश्च "प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा। प्रदोषोऽस्तमयादूर्द्ध्वं घटिकाद्वयमिष्यते" इति वत्सवचनात् यद्दिने प्रदोषनिशीथोभयव्यापिनी पौर्णमासी तद्दिने कोजागरकृत्यम् उभयव्याप्त्यनुरोधात्। यदा तु पूर्वदिने निशीथव्याप्तिः परदिने प्रदोषव्याप्तिस्तदा परेद्युस्तत्कृत्यम्। प्रधानपूजाकालव्याप्त्यनुरोधात्। यदा तु पूर्व्वदिने निशीथव्याप्तिः परदिने न प्रदोषव्याप्तिस्तदा सुतरां पूर्व्वेद्युस्तत्कृत्यम् "अहःसु तिथयः पुण्याः कर्म्मानुष्ठानतो दिवा। नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते" इति वचनात्"।

"नारिकेलोदकं पीत्वा अक्षैर्जागरणं निशि। तस्मै वित्तं प्रयच्छामि कोजागर्त्ति महीतले" कृत्यकौमुदी। तत्राक्षक्रीड़ा कार्य्या। अक्षक्रीडाविशेषश्च चतुरङ्गशब्दे वक्ष्यते। "या तु कोजागरे याते" ति॰ त॰ राजमार्त्तण्डः।

**कोट** पु॰ कुट—घञ्। १कौटिल्ये। आधारे घञ्। दुर्गे(गड) मेदि॰। ततः चतुरर्थ्याम् अश्मा॰ र कोटर कोटरसन्निकृष्टदेशादौ त्रि॰ [ विद्धतिः स्त्रियां ङीष्।

**कोटक** पुंस्त्री कुट—ल्वुल् जातिभेदे ब्रह्मवै॰ जातिशब्दे

**कोटचक्र** न॰ कोटस्य दुर्गस्य शुभाशुभज्ञापनार्थे अष्टविधे चक्रभेदे चक्रशब्दे विद्धतिः। "कोटचक्रमष्टविधं चतुरस्रादिभेदतः "इति नरपतिजयचर्य्या

**कोटर** पुंन॰ कोटं कौटिल्यं राति रा-क। वृक्षस्कन्धादिस्थगह्वरे। "चलत्फणाधरमिव कोटरं तरुः" माघः। "महाहङ्कारविटपइन्द्रियाङ्कुरकोटरः" भा॰ आश्व॰ ४७अ॰ र दुर्गसन्निकृष्टदेशादौ त्रि॰ व्युत्पत्तिः कोटशब्दे दृश्या। कोटरं दुर्गसन्निकृष्टं वनम् तथाभूतवृक्षाणां वा वनम् कोटरा॰ पूर्व्वपददीर्घः णत्वञ्च। कोटरावणम् वनभेदे न॰।

**कोटरादि** पु॰ वनशब्दे परे पूर्व्वस्वरदीर्घनिमित्ते पा॰ग॰ सूत्रोक्ते शब्दगणे स च गणः। "कोटर मिश्रक सिध्रक पुरग शारिक"।

**कोटरी** स्त्री कोटं कौटिल्यं रीणाति री—बधे गतौ च क्विप् १नग्नायां स्त्रियां २दुर्गायाञ्च अमरटीका।

**कोटवी** स्त्री कोटं कौटिल्यं दुर्गं वा वाति वा—गतौ हिंसने क गौरा॰ङीष्। १दुर्गायाम् धरणिः। २नग्नायां स्त्रियां अमरटीका।

**कोटि** स्त्री कुट—इञ्। १धनुषोऽग्रभागे अमरः २वस्तुमात्रस्याग्रभागे, ३अस्त्राणां कोणे ४उत्कर्षे ५शतलक्षमितसंख्यायां, ६तत्संख्येये च मेदि॰। ७स्पृक्कायाम् (पिड़िङ्गशाक) अमरः ८संशयस्यालम्बने,वादे निर्णयार्थं कृते ९पूर्व्वपक्षे, वा ङीप् कोटीत्यप्यत्र। "धनुष्कोट्यां तदा कर्णेन वीरम्" भा॰ आ॰ १अ॰। "तेन